**परीक्षा- एम. ए.** **सेमेस्टर- प्रथम** **वर्ष-2022**

**विषय – संस्कृतम्**

**प्रश्नपत्रम् – MSA-C114** **विवरणम् – संस्कृतकाव्यं नाटकञ्च**

**समय- 03 होराः** **पूर्णाङ्कः -70**

**खण्ड – अ(Section-A)**

**(लघूत्तरीयप्रश्नाः)**

**नोटः केचन पञ्च प्रश्नाः समाधेयाः। एकस्य प्रश्नस्य संस्कृते उत्तरम् अनिवार्यतया लेख्यम्।** **5X 6 = 30**

**प्रश्न-1** मेघदूतानुसारेण " उपमा कालिदासस्य " विषये सप्रमाणं लिखत।

**प्रश्न-2** मेघदूतस्य गीतिकाव्यत्वं सोदाहरणं स्पष्टयतु।

**प्रश्न-3** उत्तररामचरिते वर्णितां रसनिष्पत्तिं सोदाहरणं स्पष्टयत।

**प्रश्न-4** उत्तररामचरितस्य नायिकायाः चरित्र-चित्रणं सोदाहरणं चित्रयत।

**प्रश्न-5** उत्तररामचरितानुसारेण भवभूतेः भाषाशैली प्रमाणसहितं विवेचनीया।

**प्रश्न-6** मेघदूते वर्णितं प्रकृतिसौन्दर्यं वर्णयत।

**प्रश्न-7** "नैषधे पदलालित्यम् " उक्तिरियं प्रमाणसहितं समीक्ष्यताम्।

**प्रश्न-8** महाकवेः श्रीहर्षस्य उत्प्रेक्षा-अलङ्कारस्य सौन्दर्यं प्रस्तूयताम्।

**प्रश्न-9 सूक्तिद्वयं व्याख्यापयत –**

(i) मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।

(ii) दुर्जनोऽसुखमुत्पादयति।

**प्रश्न-10 द्वे सूक्ती व्याख्याहि –**

(i) सत्सङ्गजानि निधनान्यपि तारयन्ति।

(ii) दयासमुद्रे स तदाशयेऽतिथिचकार कारुण्यरसापगा गिरः।

## खण्ड – ब (Section-B)

**(दीर्घोत्तरीयप्रश्नाः)**

**नोट- केचन चत्वारः प्रश्नाः समाधेयाः। एकस्य प्रश्नस्य संस्कृते उत्तरम् अनिवार्यतया देयम्। 4X10 =40**

**प्रश्न- 1** उत्तररामचरितानुसारेण भवभूतेःनाट्यकलां सोदाहरणं वर्णयत।

**प्रश्न- 2** "कारुण्यं भवभूतिरेव तनुते " उक्तिरियं सोदाहरणं विवेचनीया।

**प्रश्न- 3** "नैषधं विद्वदौषधम्" उक्तिरियं सोदाहरणं व्याख्यापयितव्या।

**प्रश्न- 4** नैषधीयचरितमाश्रित्य महाकवेः श्रीहर्षस्य काव्यसौष्ठवं सोदाहरणं प्रस्तूयताम्।

**प्रश्न- 5** मेघदूतमाश्रित्य महाकवेःकालिदासस्य काव्यकलां सोदाहरणं वर्णयत।

**प्रश्न- 6** मेघदूते वर्णितां विरहवेदनां सोदाहरणं विवेचयत।

**प्रश्न- 7 अधोलिखितौ श्लोकौ व्याख्यापयितव्यौ-**

(i) दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्॥

(ii) त्वामारुढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः।
कः सन्निद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥

**प्रश्न- 8 श्लोकौ व्याख्यापयितव्यौ-**

(i) क्लीष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं न हि तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि॥

(ii) नव लता गन्दवहेन चुम्बिता
पकरम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुङ्मला
दरादराभ्यां दरकम्पिनी पपे॥